## नवमः पाठः

# वसन्तोत्सवः

माघमासस्य शुक्लपक्षस्य पञ्चम्यां तिथौ ऋतुराजवसन्तस्य आगमनसूचना भवति। वसन्तपञ्चमी श्रीपञ्चमी नाम्ना अपि ज्ञायते। अस्मिन् समये प्रकृतेः सौन्दर्यं चरमोत्कर्षं प्राप्नोति। सर्वत्र रमणीयतायाः दर्शनं भवति। वृक्षेषु नूतनकिसलयरागः राजते। क्षेत्रेषु सर्षपपुष्पाणां सुषमा पीतिमा च मनोहारिणी दृश्यते। आम्रेषु मञ्जरीं परितः भ्रमन्तः भ्रमराः दृश्यन्ते। कोकिलानां मधुरस्वरः चित्तम् आकर्षति। वसन्तसमये सर्वत्र रमणीयतायाः दर्शनं भवति। वसन्तोत्सवे शीतकालस्य अनन्तरं परम्परया सौन्दर्यस्य पूजनं क्रियते। विविधैः पुष्पैः, नवान्नैः, फलैः च ऋतुराजस्य वसन्तस्य स्वागतं भवति। एषः उत्सवः सौन्दर्यस्य रमणीयतायाः पुष्पाणां, किसलयानां मधुरागमनस्य च उत्सवः अस्ति।

वसन्तोत्सवस्य द्वितीयपक्षः अधिकः महनीयः अस्ति। भारते वसन्तवेलायां भगवत्याः सरस्वत्याः आराधनस्य अपि परम्परा विद्यते। वसन्तपञ्चमी ज्ञानस्य उपासनायाः आराधनायाः च उत्सवः अस्ति। प्राचीनकाले वसन्तपञ्चम्यां ज्ञानयज्ञतपस्वरूपां सरस्वतीं जनाः पूजयन्ति स्म। अधुना अपि सम्पूर्णे देशे आध्यात्मिकजिज्ञासया अस्मिन् दिने जनाः ज्ञानस्य अधिष्ठात्रीं शारदां पूजयन्ति। वसन्तोत्सवः वस्तुतः सांस्कृतिकः उत्सवः अस्ति। वैदिक-कालात् एव अस्मिन् दिने सरस्वत्याः उपासना भवति। महाभारते पुराणेष्वपि वसन्तोत्सवः सरस्वत्याः उपासनायाः उत्सवरूपेण दर्शितः। वसन्तपञ्चम्याम् आगमविधिना महाशक्त्याः सरस्वत्याः वार्षिकपूजायाः विधानं भवति। विशेषतः उत्तरभारते बिहारप्रान्ते, बङ्गालप्रान्ते तथा काश्मीरप्रदेशे सरस्वतीपूजनं बहुमान्यम् अस्ति। दक्षिणे तमिलनाडुक्षेत्रे अपि एतस्य महत्त्वं विद्यते। तत्र आबालवृद्धपरिजनाः प्रकाशितान् हस्तलिखितान् च ग्रन्थान् एकस्यां पीठिकायां संस्थाप्य विविधैः उपचारैः शारदाम् अर्चयन्ति। एतेन सममेव वाद्ययन्त्राणां वीणादीनां पूजनमपि भवति। कुत्रचित् दक्षिणभारते शिल्पिनः स्वयन्त्राणाम् अपि अस्मिन् दिने पूजनं कुर्वन्ति।



सरस्वतीपूजनस्य वेदाध्ययनसत्रं श्रावणीपूर्णिमात: आरभ्य वसन्तपञ्चमीं यावत् भवति। सरस्वतीं पूजयित्वा ऋतुपरिवर्तनस्यारम्भे जीवने हर्षोल्लासं, सौन्दर्यं, शृङ्गारं च कामयितुं वसन्तस्य, कामदेवस्य अपि पूजनं परम्परया भवति। वस्तुत: भारतीयपरम्परायां वसन्तोत्सव: सौन्दर्यस्य, उल्लासस्य, ज्ञानस्य उपासनाया: च उत्सव:। एष: भारतीयानां उत्सवप्रियताया: शास्त्रीयं, सामाजिकं तथा वैज्ञानिकं चिन्तनम् अपि द्योतयति।

## शब्दार्था:

| | | |
|---|---|---|
| चरमोत्कर्षम् | — | अत्यधिक उन्नत |
| नूतनकिसलयराग: | — | नवीन पत्तों की शोभा |
| मञ्जरी | — | बौर (आम के बौर) |
| अधिष्ठात्रीम् | — | मुख्य देवी को |
| वाद्ययन्त्राणाम् (वाद्योपकरणानाम्) | — | बजाए जाने वाले यंत्रों का (वीणा आदि) |
| वेदाध्ययनसत्रम् | — | वेद के अध्ययन की अवधि |
| उल्लास: | — | हर्ष, सर्षप — सरसों |
| आबालवृद्धा: | — | बच्चों से लेकर वृद्ध तक |
| पीठिका | — | चौकी |
| विधानम् | — | विधि |
| उपचारै: | — | पूजा विधि से |
| महनीय: | — | महत्तर |
| आगमविधिना | — | शास्त्रवर्णित विधि से |

## अभ्यास:

1. **एकपदेन उत्तरं लिखत—**

   क. वसन्तपञ्चमी कस्य आगमनं सूचयति?

   ख. केषु नूतनकिसलयराग: राजते?

   ग. कोकिलानां मधुरस्वर: किम् आकर्षति।

   घ. वसन्तोत्सवे कस्या: पूजनं भवति?

   ङ. ज्ञानस्य अधिष्ठात्री देवी का?

2. **एकवाक्येन उत्तरं लिखत—**

   क. ऋतुराजवसन्तस्य आगमन-सूचना कदा भवति?

   ख. आम्रेषु कीदृशा: भ्रमरा: दृश्यन्ते?

   ग. तमिलनाडुराज्ये जना: शारदां कथम् अर्चयन्ति?

   घ. वसन्तोत्सव: किं किं द्योतयति?

   ङ. उत्तरभारते कुत्र-कुत्र सरस्वतीपूजनं बहुमान्यम् अस्ति?

3. **प्रश्ननिर्माणं कुरुत ( रेखाङ्कितपदम् आधृत्य )—**

क. विविधैः पुष्पैः ऋतुराजस्य स्वागतं भवति।

ख. पुस्तकानाम् अपि पूजनं भवति।

ग. शारदाम् अर्चयन्ति।

घ. सौन्दर्यं कामयितुं वसन्तपूजनं भवति।

ङ. श्रीपञ्चमीनाम्ना वसन्तपञ्चमी ज्ञायते।

4. **अर्थानुसारं युग्मानि योजयत—**

| | ( अ ) | ( ब ) |
|---|---|---|
| क. | मञ्जरीं परितः | श्रीपञ्चमी |
| ख. | सरस्वतीं | वसन्तपञ्चमीं यावत् |
| ग. | वसन्तपञ्चमी | भ्रमराः दृश्यन्ते |
| घ. | श्रावणपूर्णिमातः | चरमोत्कर्षं प्राप्नोति |
| ङ. | प्रकृतेः सौन्दर्यं | पूजयन्ति स्म |

5. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत—**

क. सरस्वतीपूजनम् ख. वसन्तसमये

ग. प्राचीनकाले घ. वसन्तोत्सवः

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—**

क. चरमोत्कर्षम् ख. पुराणेष्वपि

ग. पूजनमपि घ. सममेव

7. **पाठात् पञ्च अव्ययानि चित्वा लिखत।**

**योग्यताविस्तारः —**

- वसन्तोत्सवस्य विशेषताः आधृत्य पञ्च वाक्यानि लिखत।
- भवतः/भवत्याः विद्यालये आयोजितम् उत्सवम् आधृत्य पञ्चवाक्यानि लिखत।

*सर्वं प्रियं चारुतरं वसन्ते।*